# ॥ श्रीजनककजा प्रपत्ति सारस्तोत्रम् ॥

.. shrIjanakajA prapatti sArastotram ..

sanskritdocuments.org

September 23, 2017

# .. shrIjanakajA prapatti sArastotram ..

# ॥ श्रीजनकजा प्रपत्ति सारस्तोत्रम् ॥

## Sanskrit Document Information

Text title : janakajA prapatti sArastotram

File name : janakajAprapattisArastotram.itx

Category : devii, otherforms, prapatti

Location : doc_devii

Latest update : September 22, 2017

Send corrections to : Sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


September 23, 2017

*sanskritdocuments.org*

न वाग्वपुर्बुद्धिभिरेव कस्यचित्
कदापि हिंसास्तु शरीरिणा वृथा ।
भवत्यदाम्बोरुह चिन्तनं विना न
चाप यात्वदम्बुज वीक्षणेक्षणः ॥ १॥

हसन्तु निन्दन्तु वदन्तु दुर्वचो
जनानियुक्ता हृदयस्थितेन वै ।
केनापिदेवेन दयाश्रितं सदा न
संस्थितिं स्वां प्रजहास्तु मे मनः ॥ २॥

निन्दाभयं मेऽस्तु तथा न जातु
चिद्यथेह निद्रा चरणान्ममोरसि ।
परोपकाराय सदास्तु मे मतिर्न
चापकाराय कदापि कस्यचित् ॥ ३॥

माक्रूर दृष्टिर्मम सत्सु भूयान्निरी
क्ष्यमाणोस्य सकोप नेत्रैः ।
मा सेवतस्तान विपक्षबुद्ध च
साधून्मदो मे हृदयं वृणोतु ॥ ४॥

अपात्र पूजा न च पात्रहेलनं
तिरस्क्रिया नाप्यपराध्यतां सताम् ।
अदण्ड्य दण्डेस्तु न मे कृतघ्नता
मयो क्रिया कापि विदेहनन्दिनी ॥ ५॥

योषित्सु सर्वासु च मातृबुद्धि-
स्तथास्तु मे स्वसृमतिःप्ररूढाः ।
बालेषु सर्वेषु च बन्धुबुद्धिर्मा-
नीच बुद्धिः सततं ममास्तु ॥ ६॥

विश्वासघातो न तथा कदर्यता ना
भक्ष्यपेयाशनपानमस्तु मे ।
न शास्त्र संवर्जित कर्मसुस्पृहा
कदापिभूयान्महिते महीयसाम् ॥ ७॥

सहिष्णुता क्षान्तिरमन्दशुमुषी-

वात्सल्यताऽव्याज कृपा विनम्रता ।
उदारता ह्री मृदुता सुशीलता न
जातु चैता हृदयं त्यजन्तु मे ॥ ८॥

मदाश्रिताः क्लेशयुता न सन्तु वै
विशेषतो भागवता उपेक्षया ।
नाऽग्यागताःक्रूरगिरा दृशार्दिता
समुछ्वसन्तु स्मयदूषितात्मनः ॥ ९॥

ऋते त्वदुच्छिष्टमथान्यवस्तुषु-
स्याभोग बुद्धिर्न कदापिमामकी ।
त्वदर्थमेवाऽखिलचेष्टितं हि मे
भक्तापराधो न कदापि मां स्पृशेत् ॥ १०॥

रतिः प्रवृत्तौ विरतिर्निवृत्तौ
सङ्गोऽसतां नास्तु सतामसङ्गः ।
सर्वेषु सर्वास्वनुरागदृष्टिर्मा
दोषदृष्टिर्मम कर्हिचित्स्यात् ॥ ११॥

स्वभृत्यसम्पोषणसक्तचेतसा
नोपेक्षितःसन्तुमया-त्वदाश्रिताः ।
लोभाभयाद्वा निजधर्मवर्जिताः
क्रियास्तु नो कापि तवानुकम्पया ॥ १२॥

स्वन्पोषमं मानुषमेत्य जज्म
स्वर्वासिमृग्यं क्षण भङ्गुरं च ।
वैरं न कुर्यां तव तुष्टिकामः
केनाप्यहं श्री निमिवंश भूषे ॥ १३॥

न्यायालयं ते क्षमता प्रधानं
न्यायप्रधानं न वदन्ति सन्तः ।
क्षान्तिरप्रधाना मातरस्तु तस्मा-
यायप्रधाना न मम क्षमाब्धे ॥ १४॥

भयं न मे स्याच्चरतः स्वधर्मं
कालादपिं प्राप्तविवेक दृष्टेः ।

मत्तस्तथा तन्न पिपीलिकानां
सौभाग्यमेतत्कृपया प्रयच्छ ॥ १५॥

स्वशिक्षये वा दृढयन्स्वधर्मे
समाश्रितान्भागवते प्रधाने ।
अनेक सांसारिक भोगशक्तं न
काङ्क्षितं जन्म चिराय लोके ॥ १६॥

त्वद्धामवासस्तव कीर्ति गानं
त्वन्नामसङ्कीर्तन मेव नित्यम् ।
अम्बाशुभोत्सङ्ग विहारशीले
स्वरूपसञ्चिन्तनमस्तु मह्यम् ॥ १७॥

अन्यान्य देवार्चन वन्दनस्मृतिस्तव-
प्रपत्तिः श्रवणानुरागिता ।
स्वप्नेऽपि भूयादिह भक्तिकोटिका
नानन्यता पाठपरायणस्यमे ॥ १८॥

पूज्यानुवन्द्या परिभावनीया-
ज्ञेयानुज्ञेया समुपासनीया ।
श्रेयः परं काङ्क्षिभिरात्मनिष्ठै-
स्त्वमेवहित्वाखिल कर्म जालम् ॥ १९॥

स मे पिता सा जननी स बन्धुः
सखा स दाता स पतिः गुरुःसः ।
कृपालुतोपेक्षित सर्वदोषः
सेवा सहायो य इहास्त्वमीहः ॥ २०॥

परमलालनैः पाल्यते त्वया
निरयकर्म कृन्मादृशो जनः ।
करुणया यया हेतुहीनया कुरु
न मां तया सेवयोज्झितम् ॥ २१॥

विनय एव मेज्यऽहि साञ्जलिः
सुनयनाकभूषे प्रसीदतम् ।
अनुदिनं तवोच्छिष्ट जीवतो

वनरुहाक्षि मो चेत्तु का गतिः ॥ २२॥

॥ इति श्रीजनकजा प्रपत्ति सारस्तोत्रम् ॥

.. shrIjanakajA prapatti sArastotram ..

Searchable pdf was typeset using generateactualtext feature of XeLaTeX 0.99996

on September 23, 2017

Please send corrections to *sanskrit@cheerful.com*